# षष्ठी शेषे (२.३.५०)

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषः। तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधो दकस्योपस्कुरुते। भजे शम्भोश्चरणयोः।

**व्याख्या**

**सूत्रविवरणम्** – पदद्वयात्मकमिदं सूत्रम्। 'षष्ठी' इति प्रथमायाः एकवचनम्, 'शेषे' इति सप्तम्याः एकवचनम्।

**सूत्रार्थविवरणम्** – उक्ताद् अन्यः शेषः। अत्र शेषपदस्य अर्थस्तावत् ये अर्थाः एतस्मात् पूर्ववर्तिभिः सूत्रैः उक्ताः तेभ्यः अन्यः अर्थः शेषः भवति। एवञ्च शेषार्थे षष्ठी विभक्तिः भवति। एतस्मात् पूर्ववर्तिषु सूत्रेषु कर्मादीनां काराकाणां तत्प्रयुक्तविभक्तीनां च आलोचना प्राप्यते।अतः स कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषः इति।

**उदाहरणम्** - तद्यथा राज्ञः पुरुषः इति एकमुदाहरणम्। अत्र राजा स्वामी, पुरुषः स्व इति। अर्थात् राजाश्रित-स्वामित्वनिरुपित-स्वत्वात्मक-सस्बन्धाश्रयः पुरुषः इति वाक्यार्थबोधः। अतः अनयोः मध्ये स्वस्वामिभावसम्बन्धः विद्यते।

द्वितीयतः वरदाराजाचार्यः वदति 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव' इति। अर्थात् वाक्ये यदि कर्मादीनाम् अविवक्षा स्यात् एवञ्च शेषस्य विवक्षा विद्यते तदा कर्मदिषु अपि षष्ठी भवति। ततः उदाहरणं प्रदीयते।

सताम् गतम् – अत्र सद्भिः गतम् इति कर्तृत्वस्य अविवक्षां कृत्वा सताम् गतम् इति सम्बन्धमात्रस्य विवक्षावशात् षष्ठी भवति।

सर्पिषो जानीते – अत्र सर्पिषा जानीते इति करणस्य अविवक्षा।

मातुः स्मरति – अत्र मातरं स्मरति इति कर्मणः अविवक्षां कृत्वा केवलं सम्बन्धमात्रस्यैव विवक्षायाम् षष्ठी भवति।

एधोदकस्य उपस्कुरुते – अत्र एधः उदकम् उपस्कुरुते इति कर्मणः अविवक्षा।

भजे शम्भोश्चरणयोः – अत्रापि कर्मणः अविवक्षा विद्यते शम्भोश्चरणौ भजे इति।

अत्रावधेयं यदा तु कर्मादीनां विवक्षा भवति तदा कर्मादिस्थले द्वितीयादयः विभक्तयः भवन्ति।